শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্ভাগৱতে দশমস্কন্ধে

# ॥ শ্রী জ্ৱরস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী জ্ৱরস্তুতিঃ ॥

জ্ৱর উৱাচ
নমামি ৎৱানন্তশক্তিং পরেশং
সর্ৱাত্মানং কেৱলং জ্ঞপ্তিমাত্রম্।
ৱিশ্ৱোৎপত্তিস্থানসংরোধহেতুং
যত্তদ্ ব্রহ্ম ব্রহ্মলিঙ্গং প্রশান্তম্॥ **1** ॥

কালো দৈৱং কর্ম জীৱঃ স্ৱভাৱো
দ্রৱ্যং ক্ষেত্রং প্রাণ আত্মা ৱিকারঃ।
তৎসঙ্ঘাতো বীজরোহপ্রৱাহঃ
ৎৱন্মাযৈষা তন্নিষেধং প্রপদ্যে॥ **2** ॥

নানাভাৱৈর্লীলযৈৱোপপন্নৈঃ
দেৱান্ সাধূন্ লোকসেতূন্ বিভর্ষি।
হংস্যুন্মার্গান্ হিংসযা ৱর্তমানান্
জন্মৈতত্তে ভারহারায ভূমেঃ॥ **3** ॥

তপ্তোঽহং তে তেজসা দুঃসহেন
শান্তোগ্রেণাত্যুল্বণেন জ্ৱরেণ।
তাৱত্তাপো দেহিনাং তেঽঙ্ঘ্রিমূলং
নো সেৱেরন্ যাৱদাশানুবদ্ধাঃ॥ **4** ॥

শ্রীভগৱানুৱাচ
ত্রিশিরস্তে প্রসন্নোঽস্মি
ৱ্যেতু তে মজ্জ্ৱরাদ্ ভযম্।

যো নৌ স্মরতি সংৱাদং
তস্য ৎৱন্ন ভৱেদ্ ভযম্॥ 5॥

॥ ইতি শ্ৰী জ্ৱরস্তুতিঃ সমাপ্তা॥